शिवाभ्यां नमः

# १२. कृष्णद्वादशमञ्जरी

## 12. கிருஷ்ணதுவாதசமஞ்ஜரீ

दुराशान्धोऽमुष्मिन् विषयविसरावर्तजठरे
तृणच्छन्ने कूपे तृणकबळलुब्धः पशुरिव ।
पतित्वा खिद्येऽसावगतिरित उद्धृत्य कलये:
कदा मां कृष्ण त्वत्पदकमललाभेन सुखितम् ।। १

*கெட்ட ஆசையால் பார்வை இழந்த நான் வெளிப் பொருள் நாட்டமென்ற சுழலின் நடுவே, புதரால் மூடப்பட்ட பாழுங்கிணற்றில் ஒருபிடி புல்லிற்கு ஆசைப்பட்ட ஆடுமாடு விழுவதுபோல் விழுந்து துன்புறுகிறேன். இவன் வேறு போக்கற்றவன் எனக்கருதி என்னை இதிலிருந்து தூக்கிமேலே கொணர்ந்து, உமது திருவடித்தாமரையை பற்றச் செய்து எப்போது இன்பு றச் செய்வீர்? (1)*

कथञ्चिद्यच्चित्ते कमलभवकामान्तकमुखाः
वहन्तो मज्जन्ति स्वयमनवधौ हर्षजलधौ ।
क्व तद्दिव्यश्रीमच्चरणकमलं कृष्ण भवतः
क्व चाहं तत्रेहा मम शुन इवाखण्डलपदे ।। २

*க்ருஷ்ண! பிரும்மா சிவன் முதலானோர் தம் சித்தத்தில் எப்படியோ உமது திருவடித் தாமரைகளைச் சுமந்து எல்லையற்ற ஆனந்தக் கடலில் மூழ்கின்றனர். அந்த உமது திருவடி எங்கே ! நான் எங்கே! இந்திர பதவிக்கு நாய் ஆசைப்படுவது போல் உமது திருவடியில் எனக்கு ஆசை. (2)*

दुरापस्त्वं कृष्ण स्मरहरमुखानां तदपि ते
क्षतिः का कारुण्यादगतिरिति मां लालयसि चेत् ।
प्रपश्यन् रथ्यायां शिशुमगतिमुद्दामरुदितं
न सम्राडप्यङ्के दधदुरुदयस्सान्त्वयति किम् ।। ३

*கிருஷ்ண! சிவன் முதலானோருக்கு நீர் எளிதில் கிட்டாதவர். கருணையால் என்னை லாலனை செய்வீரேயாகில் உமக்கு என்ன நஷ்டம்? ஆதரவற்ற ஒரு குழந்தை வீதியில் விசித்து விசித்து அழுகிறது. அரசனாயினும் அதைக் கண்டவன் பரிவுடன் மடியிலிட்டு ஸமாதானப்படுத்து வதில்லையா? (3)*

**प्रतिश्वासं नेतुं प्रयतनधुरीणः पितृपतिः**
**विपत्तीनां व्यक्तं विहरणमिदं तु प्रतिपदम् ।**
**तथा हेयव्यूहा तनुरियमिहाथाप्यभिरमे**
**हतात्मा कृष्णैतां कुमतिमपहन्या मम कदा ॥ ४**

*கிருஷ்ண! யமன் ஒவ்வொரு மூச்சின் இடையிலும் கொண்டு செல்ல முயல்வதில் முன் நிற்கிறான். ஒவ்வொரு அடியிலும் விபத்துகள் வெளிப்படையாக விளையாடுகின்றன. இந்த உடலும் தன் கூட்டைப் பிரித்துக் கொள்ள ஆயத்த மாயுள்ளது. அப்போதும் விஷய சுகம் நாடி என்னை அழித்துக் கொள்கிறேன். இந்தத்தவறான பாதையில் செல்கிற புத்தியை எப்போது தடுத்து நிறுத்துவீர். (4)*

**विधीशाराध्यस्त्वं प्रणयविनयाभ्यां भजसि यान्**
**प्रियस्ते यत्सेवी विमत इतरस्तेषु तृणधीः ।**
**किमन्यत्सर्वाऽपि त्वदनभिमतैव स्थितिरहो**
**दुरात्मैवं ते स्यां यदुवर दयार्हः कथमहम् ॥ ५**

*யதுக்களில் சிறந்தவரே! நீர் பிரும்மாவாலும் ஈசனாலும் வழிபடத்தக்கவர். நீர் அன்புடனும் அடக்கத்துடனும் அவர் களுடன் பழகுகிறீர். அவர்களை வழிபடுபவன் உமக்குப் பிரியமானவன். அவர்களைப் பொருட்படுத்தாதவன் உமக்கு எதிரி. இங்கோ எல்லா நடைமுறைகளும் நீர் விரும்பாதவை. உம் கண்களில் கெட்ட எண்ணம் கொண்டவனாகப்படுவேன். நான் உமது பரிவிற்கு உரியவனாவது எப்படி? (5)*

**विनिन्द्यत्वे तुल्याधिकविरहिता ये खलु खलाः**
**तथाभूतं कृत्यं यदपि सह तैरेव वसतिः ।**

तदेवानुष्ठेयं मम भवति नेहास्त्यरुचिर-
प्यहो धिङ्मां कुर्वे किमिव न दया कृष्ण मयि ते ।। ६

நான் யாருடன் கூடி வாழ்கிறேனே அந்த போக்கிரிகள் நிந்திக்கத்தக்கவர் என்பதில் ஈடிணையற்றவர். அவ்வாறு எமது செயல் முறை. அதே தொடர்ந்து பின்பற்றப் படுகிறது. அதில் அருசி ஏற்படவில்லை. நான் ஒன்றுக்கும் உதவாதவன். என்ன செய்வேன்! கிருஷ்ணா! என்னிடம் உமக்குப் பரிவில்லையா? (6)

त्वदाख्याभिख्यानत्वदमलगुणास्वादनभवत्-
सपर्याद्यासक्ता जगति कति वाऽऽनन्दजलधौ ।
न खेलन्त्येवं दुर्व्यसनहुतभुग्गर्भपतित-
स्त्वहं सीदाम्येको यदुवर दयेथा मम कदा ।। ७

யதுக்களில் சிறந்தவரே! உமது பெயரை உரக்கக் கூறுதல், உமது தூய குணங்களைச் சுவைத்தல், உம்மை வழிபடுதல் இவற்றில் ஈடுபட்டுப் பலர் உலகில் ஆனந்தக் கடலில் விளையாடுகிறார்கள். நானோ கெட்டபழக்கங்கள் என்ற தீயின் நடுவில் விழுந்து தனித்து வாடுகிறேன். நீர் எப்போது பரிவு காட்டுவீர். (7)

कदा वा निर्हेतून्मिषितकरुणालिङ्गितभवत्-
कटाक्षालम्बेन व्यसनगहनान्निर्गत इतः ।
हताशेषग्लानिन्यमृतरसनिष्यन्दशिशिरे
सुखं पादाम्भोजे यदुवर कदाऽसानि विहरन् ।। ८

யதுக்களில் சிறந்தவரே! காரணமின்றி வெளிப்பட்ட கருணையால் அணைக்கப் பெற்று உமது கடாட்சத்தைப் பிடித்துக் கொண்டு, கெட்டபழக்கங்களாகிற அடர்ந்த காட்டிலிருந்து வெளிப்பட்டு களைப்பனைத்தையும் அகற்றுவதும், அமுத நீர்ப்பெருக்கால் குளிர்ந்ததுமான உமதுதிருவடிகளில் இனிது எப்போது பொழுது போக்கிக் கொண்டிருப்பேன் (8)

अनित्यत्वं जानन्नतिदृढमदर्पः सविनयः
स्वके दोषेऽभिज्ञः परजुषि तु मूढस्सकरुणः ।

सतां दासःशान्तः सममतिरजस्रं तव यथा
भजेयं पादाब्जं यदुवर दयेथा मम कदा ।। ९

*யதுக்களில் சிறந்தவரே! அனைத்தும் நிலைத்துநிற்பதில்லை என்பதைத்திடமாக உணர்ந்து, செறுக்கின்றிப் பணிவுடன், தன் குறை அறிபவனாக, பிறர்குறை உணராதவனாக, பரிவுடையவனாக, நல்லோரிடம் தாஸனாக, அமைதியுள்ளவனாக, சமநோக்குள்ளவனாக, எப்போதும் உமது திருவடித்தாமரையை வழிபடுமாறு எப்போது பரிவு காட்டப் போகிறீர்: (9)*

कराळं दावाग्निं कबळितवता देव भवता
परित्राता गोपाः परमकृपया किं न हि पुरा ।
मदीयान्तर्वैरिप्रकरदहनं किं कबळयन्
दयासिन्धो गोपीदयित वद गोपायसि न माम् ।। १०

*கோபிகளின் அன்பரே! கருணைக்கடலே! நீர் கொடும் காட்டுத் தீயை விழுங்கிப் பெரும் கருணையுடன் கோபர்களை முன்னர் காப்பாற்றினீர். எனது உள்ளத்திலுள்ள காமம் கோபம் முதலிய உள்ளெதிரிகளான நெருப்பை விழுங்கிக் காப்பாற்றுவீரல்லவா? சொல்வீர். (10)*

न भीरारुह्यांसं नदति शमने नाप्युदयते
जुगुप्सा देहस्याशुचिनिचयभावे स्फुटतरे ।
अपि व्रीळा नोदेत्यवमतिशते सत्यनुपदं
क मे स्यात्त्वद्भक्तिः कथमिव कृपा कृष्ण मयि ते ।। ११

*கிருஷ்ணா! யமன் தோள்மீதமர்ந்து முழங்கும்போது பயமில்லை. நன்கு வெளிப்படையாகத் தெரிகிற உடலின் அழுக்கு மூட்டைநிலையில் நாணமில்லை. நூறு தடவை அவமதிக்கப் பெற்றாலும் உடன் வெட்கமில்லை. எனக்கு உம்மிடம் பக்தி எவ்வாறு ஏற்படும்? என்னிடம் உமது கிருபை இருக்கட்டும். (11)*

बलीयस्यत्यन्तं मदघपटली तद्यदुपते
परित्रातुं नो मां प्रभवसि तथा नो दमयितुम्।
अलाभादार्तीनां इदमनुगुणानामदयिते
कियद्दौस्थ्यं धिङ्मां त्वयि विमतमात्मद्रुहमिमम्॥ १२

யதுக்களின் தலைவரே! எனது பாபவரிசை மிகவும் வலிவு மிக்கது. என்னைக் காக்கவோ அடக்கவோ உம்மால் இயலாது. அந்தப்பாபங்களுக்கேற்றதுயரங்கள் கிட்டாததே காரணம். எவ்வளவு குறை? உம்முடம் நல்லெண்ணமில்லாதவனும் அதனால் தனக்குத்துரோகம் விளைவித்துக் கொண்டவனுமான நான் ஒரு வீணன். (12)

கிருஷ்ணதுவாதசமஞ்ஜரி முற்றிற்று

शिवाभ्यां नमः

# १३. अच्युताष्टकम्

## 13. அச்யுதாஷ்டகம்

अभिलपननिसर्गादच्युताख्ये भजे त्वां
हरसि मदघबृन्दं त्वद्बुभुक्षावशात्त्वम्।
अघहृदिति तवाम्ब प्रत्युत ख्यातिदोऽहं
त्वयि मम वद का वा सङ्गतिर्दैन्यवाचाम्॥ १

அச்யுத என்ற பெயரே! உன்னைச் சொல்லிச் சொல்லி ஏற்பட்டபழக்கம் இயல்பாகி விட்டதால் உன்னைச் சொல்கிறேன். உன் பசிகாரணமாக நீ என் பாபக் கூட்டத்தை பறிக்கிறாய். மேலும் உனக்கு பாபத்தைப் போக்குபவள் என்ற புகழ் தந்தது நான். உன்னிடம் நான் கெஞ்சிக் கேட்பதற்கு என்ன பொருத்தம்? சொல்வாய்! (ஆக்யா என்பது பெண்பால் சொல்.) (1)

चिरातीता सान्दीपनितनुभुवः कालभवन-
प्रपत्तिस्तं पित्रोः पुनरगमयत् सन्निधिमिति।